**Shodhshauryam, International Scientific Refereed Research Journal**
Available online at : **www.shisrrj.com**
OPEN ACCESS
© 2023 SHISRRJ | Volume 6 | Issue 6
ISSN : 2581-6306
**doi :** https://doi.org/10.32628/SHISRRJ

# श्रीमद्भागवदुक्तदिशा सांख्यतत्त्वविमर्शः

कोन्डूरु हरिबाबु
शोधच्छात्रः,सांख्ययोग विभागः,राष्ट्रीयसंस्कृतविश्वविद्यालयः,तिरुपतिः।

**Article Info**
**Publication Issue :**
November-December-2023
Volume 6, Issue 6
**Page Number :** 272-278

**Article History**
Received : 02 Nov 2023
Published : 21 Nov 2023

ABSTRACT : - श्रीमन्नारायणः एव स्वयं सांख्यं योगं च अस्मिन् महापुराणे शिष्यान् उपदिदेश। सांख्ययोगदर्शनयोः समग्रतत्वं श्रीमद्भागवते निरूपितम्। पुराणं पञ्चलक्षणमिति यद्यपि प्रसिद्धं श्रीमद्भागवते पुनः विशेषतया दशलक्षणानि निरूपितानि। षड्विंशे अध्याये प्रथमश्लोकद्वयेन सांख्यलक्षणं प्रयोजनं च स्पष्टं निरूपितवान्।

**अथ ते संप्रवक्ष्यामि तत्त्वानां लक्षणं 'पृथक्।**

**यद्विदित्वा विमुच्यते पुरुषः प्रकृतेर्गुणैः ॥**

प्रकृतिः सूक्ष्मस्वरूपा दैवी गुणमयी च। गुणाश्च सत्वरजस्तमोरूपाः। गुणैः पूर्णा, गुणैः युक्ता वा गुणमयी।

**अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः।**

**प्रत्यग्धामा स्वयं ज्योतिर्विश्वं येन समन्वितम् ॥**

**स एष प्रकृतिं सूक्ष्मां दैवीं गुणमयीं विभुः।**

**यदृच्छयैवोपगतामभ्यपद्यत लीलया ॥**

Keywords :- श्रीमद्भागवत् , सांख्यदर्शनम्, कपिलः, पुरुषस्वरूपम्, मोक्षः, हृदयग्रन्धिभेदनम्, प्रकृतिस्वरूपम्, ईश्वरः, सांख्यम्, प्रकृतिः,पुरुषः, सृष्टिः।

**ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः।**

**ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा[1] ॥**

प्रशस्थः, नित्ययुक्तः भूम्ना भगनामकः सद्गुणसमुदायः यस्मिन् वर्तते स भगवान्। भगवतः इदं भागवतम्। एवं भगवति भक्ताः भागवताः। भगवतः इदं भागवतानां इदं वा भागवतम्। श्रीमद्भागवतं च यद्यपि भक्तिशास्त्रसर्वस्वमिति

[1] विष्णुसहस्रनामस्तोत्रम्-शङ्करभाष्यम् -श्लोकः -60

**Copyright © 2023 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)**

प्रसिद्धम् । तथापि सांख्यदर्शनस्य योगदर्शनस्य च प्रशंसा श्रीमद्भागवते विस्तरेण वर्तते। श्रीमन्नारायण: एव स्वयं सांख्यं योगं च अस्मिन् महापुराणे शिष्यान् उपदिदेश। सांख्ययोगदर्शनयो: समग्रतत्वं श्रीमद्भागवते निरूपितम्।

तृतीयस्कन्धे ब्रह्मण: मानसपुत्र: स्वायम्भुव: मनु: दक्षपुत्रीं शतरूपां उपयेमे। तयो: प्रभूतानां अपत्यानां मध्ये तिस्र: कन्या: प्रसिद्धा:। आकूति:, प्रसूति:, देवहूति: इति। ब्रह्मणा सृष्ट: कर्दमप्रजापति: बहुतिथं कालं श्रीमन्नारायणमुद्दिश्य तपश्चचार स्वायम्भुव: स्वपुत्र्यै देवहूत्यै कर्दम: एव योग्य: वर: इति निश्चित्य तां कर्दमाय ददौ। कर्दमदेवहूत्यो: पुत्र: एव नारायणावतार: कपिल:। पुत्रजन्मानन्तरं कर्दम: तपसे वनं ययौ। तत: विषण्णां मातरं दृष्ट्वा नारायणावतार: कपिल: तां सम्पूर्णं सांख्ययोगम् अध्यापयामास। भूलोके प्रवृत्तस्य सांख्यदर्शनस्य कपिल: आद्य: इति निश्चयेन वक्तुं शक्यते। कपिल: स्वमातरं सांख्यदर्शनं योगदर्शनं च अधिकृत्य विस्तरेण उक्तवान्। तृतीयस्कन्धे षड्विंशे अध्याये सप्तविंशे अध्याये च सांख्यदर्शनम्, अष्टाविंशे अध्याये योगदर्शनं च उपवर्णितम्। एवं एकादशस्कन्धे श्रीकृष्ण: स्वभक्तं उद्धवं सांख्यदर्शनम् उपदिदेश। एकादशस्कन्धे चतुर्वींशे, पञ्चविंशे चाध्याये सांख्ययोगनिरूपणं वर्तते। एकादशस्कन्धे एव पञ्चदशे अध्याये योगेन प्राप्यानां अष्टादशसिद्धीनां विशेषत: मानुषै: योगिभि: प्राप्यानां अष्टसिद्धीनां वर्णनं वर्तते। सांख्यं योगं च अतिरिच्य भक्तिज्ञानवैराग्ययोगत्रयाधिकारोपि एकादशस्कन्धे विंशे अध्याये अष्टाविंशे, एकोनविंशे अध्याये च विस्तरेण उपवर्णितम्।

पुराणं पञ्चलक्षणमिति यद्यपि प्रसिद्धं श्रीमद्भागवते पुन: विशेषतया दशलक्षणानि निरूपितानि। श्रीमद्भागवते द्वादशसु स्कन्धेषु द्वौस्कन्धौ कथाप्रवेशवर्णनेन उपोद्घातरूपौ। तृतीयस्कन्धादारभ्य सर्गादीनि लक्षणानि क्रमेण वर्णितानि। तृतीयस्कन्धे सर्ग: निरूपित:। तत्र षड्विंशे अध्याये भगवान् सांख्यदर्शनमनुसृत्य सृष्टिक्रममुक्तवान् तस्मिन्नेवाध्याये सृष्टे: स्वरूपं, मोक्ष लक्षणं च उक्तवान्।

**पुरुषस्वरूपम्** – षड्विंशे अध्याये प्रथमश्लोकद्वयेन सांख्यलक्षणं प्रयोजनं च स्पष्टं निरूपितवान्।

**अथ ते संप्रवक्ष्यामि तत्त्वानां लक्षणं 'पृथक्।**

**यद्विदित्वा विमुच्यते पुरुष: प्रकृतेर्गुणै: ॥**

**ज्ञानं नि: श्रेयसार्थाय पुरुषस्यात्मदर्शनम्।**

**यदाहुर्वण्ययॆ तत्ते हृदयग्रन्थिभेदनम्[2] ॥**

पञ्चविंशति तमे अध्याये मनस: भगवदर्पणेन तीव्रेण भक्तियोगेन निश्रेयसोदय: भवतीति स्पष्टम् उक्तम्। निश्रेयं- शुभम्। तच्च नि:श्रेयसं मोक्षादन्यत् न भवति। निर्गतं श्रेय: निश्रेयसम्। बन्धविमुक्त: एव भक्तो भवति। बन्धविमुक्तिश्च ज्ञानात् भवति ज्ञानेन कैवल्यं भवतीति कारणमाला सिद्धा। पुरुष: प्रकृते: पर: स च अनादि: अव्यक्तत्वात् आत्मा च। गुणत्रयातीत: इति हेतो: स्वयं ज्योति: तं ज्ञात्वा अमृत: भवति। "तमेवं विद्वान् अमृतत्वं ऐति नान्य: पन्था अयनाय विद्यते "इति श्रुते:। पुरुषज्ञानादेव मोक्ष: संख्या इति ज्ञानवाचक: शब्द:। अत: सांख्यं ज्ञानयोग एवेति भगवान् श्लोकद्वये निरूपितवान्। यद्विदित्व येषां तत्वानां ज्ञानेन प्रकृतै: गुणै: प्रकृतिसंबन्धयुक्तै: सत्वरजस्तमोगुणै: विमुक्ते भवति। एवं तत् ज्ञानेन हृदयग्रन्थिभेदनं अर्थात् अज्ञाननिवृत्तिरपि भवति।

---

2 श्रीमद्भागवतम् – तृतीयस्कन्धे 26/1,2 श्लोका:

**भिद्यते हृदय ग्रन्थिः छिद्यन्ते सर्वसंशयाः।**

**क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे[3] ॥**

इति भागवत वचनात् प्रमाणम्।

एष पुरुषः अनादिः गुणरहितः प्रकृतेः परः जीवस्वरूपः अपि स्वयं प्रकाशयुक्तः विश्वं च पुरुषसमन्वितं पुरुषस्वरूपं च। किन्तु पुरुषः विश्वात् भिन्नः।

**प्रकृतिस्वरूपम्** :- प्रकृतिः सूक्ष्मस्वरूपा दैवी गुणमयी च। गुणाश्च सत्वरजस्तमोरूपाः। गुणैः पूर्णा, गुणैः युक्ता वा गुणमयी। गुणानां प्रकृतिभूता उत्पादिका इति हेतोः प्रकृतेः गुणानां प्रकृतित्वम्। अत्र आवरणविक्षेप शक्तिभेदेन प्रकृतिः द्विविधा। आवरणशक्त्या सा एव जीवोपाधिः अविद्यारूपा विक्षेपशक्त्या सैव माया परमेश्वरी।

**प्रकृतिपुरुषयोः सम्बन्धः -**

**अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः।**

**प्रत्यग्धामा स्वयं ज्योतिर्विश्वं येन समन्वितम् ॥**

**स एष प्रकृतिं सूक्ष्मां दैवीं गुणमयीं विभुः।**

**यदृच्छयैवोपगतामभ्यपद्यत लीलया ॥**

**गुणैर्विचित्राः सृजन्तीं सरूपाः प्रकृतिं प्रजाः।**

**विलोक्य मुमुहे सद्यः स इह ज्ञानगुहाया[4] ॥**

यस्तु जीवरूपः पुरुषः सः इमां देवीं प्रकृतिं प्रविश्य सत्त्वादिगुणैः ज्ञानं आच्छादयति। प्रकृतिरपि अजा अर्थात् जन्मरहिता। जीवः सत्वरजोयुक्तां प्रकृतिं प्रविश्य बहुविधाः प्रजाः जनयति। द्वितीयः तटस्थो भूत्वा अनुशेते। जीवः आत्मानं विस्मरति ईश्वरः सर्वं जानाति। अत्र श्रीधरीये उपनिषत् प्रमाणमपि निरूपितम्।

अत्रावरणाविक्षेपशक्तिभेदेन प्रकृतिर्द्विधा, तत्र आवरणशक्त्या सैव जीवोपाधिरविद्या, विक्षेपशक्त्या सैव माया पारमेश्वरी। पुरुषश्च जीवेश्वररूपेण द्विविधः तत्र यः प्रकृत्यविवेकेन संसरति स जीवः, यस्तु प्रकृतिं वशीकृत्य विश्वसृष्ट्यादि करोति स ईश्वरः। तत्र प्रकृत्यविवेकेन जीवस्य संसारप्रकारमाह– स एष इति पञ्चभिः। सूक्ष्मामव्यक्ता दैवीं देवस्य विष्णोः शक्तिं लीलयोपगतां यदृच्छयैवाश्यपद्यत इत्यन्वयः। तस्या लीलामाह – गुणैरिति। ज्ञानं गृहयत्यावृणोतीति ज्ञानगुहा तया।[5]तथा च श्रुतिः – –

**अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम्।**

**अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोन्यः॥**

---

[3] श्रीमद्भागवतम् – 1/2/21 श्लोकः

[4] श्रीमद्भागवतम् – तृतीयस्कन्धे – 26/3 to 5 श्लोकाः

[5] श्रीमद्भागवतम् –3/26/5 श्लोकः श्रीधरीयव्याख्या प. सं 57 पु.

इति। मुमुहे आत्मानं विस्मृतवान्। एवं प्रकृतिपुरुषयोः सम्बन्धेन प्रकृत्या एव सत्वरजस्तमोभिः गुणैः एव सृष्टौ क्रियमाणायां भ्रान्तो जीवः प्रकृत्यध्यासेन आत्मनि कर्तृत्व सम्बन्धमारोपयति। पुरुषः सदा तटस्थः प्रकृतिरेव सांख्यमते सृष्टेः कारणं भ्रान्तः तत्र जीवात्मानं कारणं पश्यति इत्यर्थः। अज्ञः एव पुरुषे कर्तृत्वमारोपयति इति भगवतापि गीतासु स्पष्टम्। तदुक्तं –

**प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।**

**अहङ्कारविमूढात्मा कर्ताहमिति मन्यते**[6] **॥**

अत्र अस्मत् शब्दः भगवता प्रयुक्तः इति अहङ्कारविमूढात्मा मां पुरुषं कर्तारं मन्यते इत्यन्वयो ग्राह्यः। व्याख्यास्वपि एवमेव निरूपितम्।

**व्याख्या –** प्रकृतेः – प्रकृतिः प्रधानम् सत्त्वरजस्तमसां गुणानां साम्यावस्था। देवात्मशक्तिं स्वगुणैर्निगूढाम् इति श्रुतिप्रसिद्धा पारमेश्वरी शक्तिमायाख्या। मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्। इति श्रुतेः। तस्या गुणैः विकारैः कार्यकरणरूपेण परिणतैः शरीरेन्द्रियैरिति यावत् क्रियमाणानि अनुष्ठीयमानानि सर्वशः सर्वैः प्रकारैरुपलक्षितानि कर्माणि लौकिकानि वैदिकानि च, अहङ्कारविमूढात्मा कार्यकरणसंघाते (पृथिव्यप्तेजोवाय्वाकाश गन्धरसरूपस्पर्श शब्दानां कार्याणाम्, करणानां च मनोबुद्ध्यहङ्कारचित्तश्रोत्रत्वक्चक्षुर्जिह्वानासिका हस्तपादपायूपस्थवाचाम् संघातः समूहो देहेन्द्रियरूपः तत्र) आत्मप्रत्ययोऽहङ्कारस्तेन विविधं नानाविधं मूढः स्वरूपविवेकहीनः आत्मा अन्तःकरणं यस्य सः। अविद्यया कार्यकरणधर्मा कार्यकरणाऽभिमानी देही अविद्ययैव अहंपदवाच्ये सच्चिदानन्दे आत्मनि निर्विकारे कर्तृत्वभोक्तृत्वादिरहिते किर्यकरणगतं कर्तृत्वम् अघ्यस्य तत् तत्कर्मणाम् अहं कर्ता कर्तु शीलं यस्य स अस्ति इति मन्यते अभिमन्यते। कार्ता इति शीले तृन् प्रत्ययः। न लोका अव्ययनिष्ठाखलर्थतृनाम् इति षष्ठीनिषेधात् कर्माणीति द्वितीयान्तम्। सर्वस्य द्वे इति पाणिनीयसूत्रे द्रव्यप्रकार अवयवकात्स्न्र्यस्वपंवृत्तिः सर्वशब्दः इति कैयटोक्तेरत्र सर्वश इति सर्वप्रकारवची सर्वशब्दस्तस्मात्कर्मकारकवाचकाच्छाश् प्रत्ययः। अविद्धया कर्तृत्वमं भोक्तृत्वमं च आत्मनि निर्विकारे निष्क्रिये अभिमन्यमानः सन् तदभिमानरूपं सङ्गं कर्मणि कुरुते इति कर्मणि सज्जते अविद्वान् इत्यर्थः।

**पुरुषात्सृष्टेः समुत्पत्तिः –** निर्विकारः उदासीनः अपि पुरुषः प्रकृतिं प्रविश्य सृष्टिं जनयति इति यदुक्तं तत्सर्वा सृष्टिः भगवत्संकल्पजनितं भगवतः समुत्पन्नं ततो भिन्नमिति भागवते द्वितीयस्कन्धे दशमाध्याये स्पष्टम्। एवं पुरुषाज्जायमाना सृष्टिः पुरुषात् भिन्ना इत्यपि श्रीमद्भागवते स्पष्ठम्। श्रीमद्भागवते द्वितीयस्कन्धे दशमाध्याये भगवतः सृष्टेः निस्सरणं निरूपितम्। सर्गादि दशलक्षणात्मके भागवते सर्गः नारायणस्य आधिभौतिकं स्वरूपमित्युक्तम्। पुरुषः आध्यात्मिकः, आधिदैविकः, आधिभौतिकः इति त्रिधा स्वयं भिन्नः। योगतल्पसमुद्धितः हिरण्मयमण्डं निर्भिद्य आगतः स्वस्य निवासस्थानं अन्वेष्टुकामः आपः ससृजे। आपः नाराः तासु अयनं (निवासः) यस्य असौ नारायणः। नारायणः एक एव बहुधा आत्मानं कर्तुकामः मायया हिरण्मयं वीर्यं व्यसृजत्। तस्मादेवपुरुषात् ओजः सहः, बलं, प्राणाश्च जग्निरे। यं प्राणं आश्रित्य जीवाः अनुप्राणानि ततोऽसौ प्राणः अभूत्। भगवानेव प्राणरूपः प्राणात् अपानः समुत्पन्नः ततः प्राणादेव क्षुत् पिपासा इत्येते जाते।

[6] श्रीमद्भगवद्गीता – 3/27 श्लोकः वंशीधरीय व्याख्या च. पु. सं 96, 97

एवं स्वसंकल्पेन पिपासत: जक्षतश्च मुखम् ( भोक्तुमिच्छो: ) उत्पन्नम्। मुखादेव क्रमात् नासिका नेत्रे कर्णौ इत्यादीनि सर्वाण्ङ्गानि उत्पन्नानि। अवयवानां उत्पत्तिक्रम: द्वितीयस्कन्धे दशमाध्याये दशभि: श्लोकै: निरूपित:।

**निरभिद्यत शिश्नो वै प्रजानन्दामृतार्थिन:।**

**उपस्थ आसीत्कामानां प्रियं तदुभयाश्रयम् ॥**

**उत्सिसृक्षोर्धातुमलं निरभिद्यत वै गुदम्।**

**तत: पायुस्ततो मित्र उत्सर्ग उभयाश्रय:[7] ॥**

एवं सर्वं शरीरं भगवद्रूपमेवेति श्रीमद्भागवते स्पष्ठम्। द्वितीयस्कन्धे सांख्ययोगस्य अनुक्तत्वेपि सृष्टे: गुणाश्रयवर्णनात् सृष्टे: गुणमयत्वं च सांख्य सम्मतत्वात् तत्र सांख्या सृष्टिरेव ग्राह्या।

**सत्त्वं रजस्तम इति तिस्र: सुरनृनारका:।**

**तत्राप्येकैकशो राजन् भिद्यन्ते गतयस्त्रिधा**

**यदेकैकतरोऽन्याभ्यां स्वभाव उपहन्यते॥**

**स एवेदं जगद्धाता भगवान् धर्मरूपदृक्।**

**पुष्णाति स्थापयन् विश्वं तिर्यङ्नरसुरादिभि:[8] ॥**

**चतुर्विंशतितत्त्वानि –** कपिलात् प्रकृतिपुरुषस्वरूपं तयो: क्रियाशीलत्वं च श्रुत्वा देवहूति: सृष्टिकारणभूतयो: प्रकृतिपुरुषयो: सदसद्रूपं ब्रूहि इति कपिलं पृष्टवती। तत: कपिल: तत्त्वानां संख्यां एवं विवृतवान्।

सत्वगुणस्तमोरूपं नित्यं अव्यक्तं सद्रूपमसद्रूपं च प्रधानं प्रकृतिं, विशेषं विशेषवत् इति वदन्ति। तत: तयो: सद्रूपं गणयति त्रिभि: श्लोकै: तत्त्वानां स्वरूपमत्र निरूपितम्।

**पञ्चभि: पञ्चभिर्ब्रह्म चतुर्भिर्दशभिस्तथा।**

**एतच्चतुर्विंशतिकं गणं प्राधानिकं विदु: ॥**

**महाभूतानि पञ्चैव भूरापोऽग्निर्मरुन्नभ:।**

**तन्मात्राणि च तावन्ति गन्धादीनि मतानि मे ॥**

**इन्द्रियाणि दश श्रोत्रं त्वग्दृग्रसननासिका:।**

**वाक्करौ चरणौ मेढ्रं पायुर्दशम उच्यते[9] ॥**

---

[7] श्रीमद्भागवतम् – 2/10/26, 27 श्लोक:

[8] श्रीमद्भागवतम् – 2/10/41, 42 श्लोक:

[9] श्रीमद्भागवतम् –3/26/11 त: 13 श्लोक:

पञ्चभूतानि तेषां गुणांशाः पञ्चकर्मेन्द्रियाणि पञ्चज्ञानेन्द्रियाणि इति विंशति तत्त्वानि बहिः व्यक्तानि। श्रोत्रं, चर्म, नेत्रे, जिह्वा, नासिका इति ज्ञानेन्द्रियाणि। चरणौ, करौ, मेढ्रं, पायुः वाग् इति पञ्चकर्मेन्द्रियाणि। मनः, बुद्धिः, अहङ्कारः चित्तम् इति अन्तरिन्द्रियाणि चत्वारि। एतानि चतुर्विंशति सगुणस्य ब्रह्मणः रूपाणि। एतेषां सर्वेषां नियामकः कालः पञ्चविंशकः। कालः सृष्टिहेतुः संहारकश्चेति द्विविधः श्रीधरीये व्याख्यातः।।

**प्रभावं पौरुषं प्राहुः कालमेके यतो भयम्।**

**अहङ्कारविमूढस्य कर्तुः प्रकृतिमीयुषः ॥**

एके तु पौरुषं पुरुषस्येश्वरस्य प्रभावं कालमाहुः। तमेव कालं द्वेधा लक्षयति, यतो भयं भवति। प्रकृतिमीयुषः प्राप्तस्य। अत एव देहेऽहंकारेण विमूढस्य कर्तुर्जीवस्य। अनेन संहारकत्वेन लक्षितः[10]।

पुरुषः अपि त्रिगुणात्मकः निर्गुणात्मकः इति चतुर्विधो भवति। स च पुरुषः सृष्टेरन्तः पुरुषरूपेण सृष्टेः बहिः कालरूपेण स्वमायया चरति। सः प्रकृत्यां प्रविश्य स्वमायया तां क्षुब्धां करोति। क्षुब्धा सा दृतगर्भा हैरण्यं महत्तत्त्वं सूते। नारायणः एव निर्गुणः वासुदेवः, तामसः संकर्षणः, राजसः प्रद्युम्नः, सात्विकः अनिरुद्धः। स्वच्चत्वं अविकारित्वं शान्तत्वमिति यत्त्रयं अपां लक्षणं तत्सर्वं निगुणे भगवति वर्तते इति भगवान् नारायणः इति प्रोक्तः। भगवतः चतुर्व्यूहत्वं तत् तत् अधिष्ठातृत्वं च श्रीधरीये विस्तरेण व्याख्यातम्।

**यत्तत्सत्त्वगुणं स्वच्छं शान्तं भगवतः पदम्।**

**यदाहुर्वासुदेवाख्यं चित्तं तन्महदात्मकम्॥**

**स्वच्छत्वमविकारित्वं शान्तत्वमिति चेतसः।**

**वृत्तिभिर्लक्षणं प्रोक्तं यथाऽपां प्रकृतिः परा ॥**

**महत्तत्त्वाद्विकुर्वाणाद्भगवद्वीर्यसंभवात्।**

**क्रियाशक्तिरहंकारस्त्रिविधः समपद्यत्॥**

प्रसङ्गाच्चतुर्व्यूहोपासनामाह – यत्तदिति। सर्वागमप्रसिद्धत्वमाह। स्वच्छं विशदम्। शान्तं रागादिरहितम्। भगवतः पदमुपलब्धिस्थानम्। अत एव वासुदेवाख्यं यदाहुः। अयमर्थः अधिभूतरूपेण तस्यैव महानिति संज्ञा, अध्यात्मरूपेण चित्तमिति, उपास्यरूपेण वासुदेव इति अधिष्ठाता तु तस्य क्षेत्रज्ञः एवमहंकारे संकर्षण उपास्यः रुद्रोऽधिष्ठाता, मनस्य निरुद्ध उपास्यः, चन्द्रोऽधिष्ठाता, बुद्धौ प्रद्युम्न उपास्यः, ब्रह्माधिष्ठातेति ज्ञातव्यम्। भगवद्बिम्बग्राहित्वम्। स्वच्छत्वं भगवद्बिम्बर्गाहित्वम्। अविकारित्वं लयविक्षेपराहित्यम्। अपां प्रकृतिः केनतरङ्गादिरहितावस्था। परा भूसंसर्गात्प्राक्तनी सा यथा मधुरा स्वच्छा शान्ता च तद्वदित्यर्थः। अहंकारस्योत्पत्तिपूर्वकं लक्षणमाह– महत्तत्त्वादिति चतुर्भिः। क्रियासु शक्तिर्यस्य च क्रियाशक्तिः। त्रैविध्यमाह –वैकारिक इति। तस्य कार्यमाह। यतो यस्मान् मन आदीनां भव उत्पत्तिः। तस्मिन्

[10] श्रीमद्भागवतम् – 3/26/16श्लोकः श्रीधरीय व्याख्या च पु. सं 58

उपास्यव्यूहमाहसहस्रशिरसमिति। लक्षणमाह कर्तुत्वमिति। कर्तृत्वं देवतादिरूपेण करणत्वमिन्द्रियरूपेण। कार्यत्वं भूतरूपेण। शान्तत्वादिकं तु तत्तत्कारणगुणत्रयरूपेण[11]।

**उपसंहार: –**

अत्र सर्गो विसर्गश्च स्थानं पोषणमूतय:।
मन्वन्तरेशानुकथा: निरोधो मुक्तितराश्रय:॥
दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम्।
वर्णयन्ति महात्मान: श्रुतेनार्थेन चाञ्जसा इति।

श्रीमद्भागवते तत्पुराणलक्षणं दशविधं निरूपितम्। पञ्चलक्षणात्मकात् पुराणात् किमेतत् भिन्नमिति विमर्श: विद्वत्सु आसीत्। पञ्चलक्षणेषु इमानि गतार्थानि भवन्ति तथापि तत् तत् लक्षणानां विस्तरेण स्पष्टतया निरूपणार्थं दशधा निरूपितमिति विदुषामभिप्राय:। अद्यतन वैज्ञानिकशास्त्रे भौतिकशास्त्रं विशेषप्रधानमावहति। तदैव इति नाम्ना व्यवहृतम्। भौतिकदर्शनं केवल नास्तिकं भवति, वेदान्तदर्शनं आस्तिकमपि पदार्थानां नित्यत्वं नाङअगीकरोति। एवं विरुद्धयो: आध्यात्मिकभौतिकविज्ञानयो: समन्वय: भारतीयसांख्यदर्शने दृष्ट:। सांख्यै: यानि भौतिकानि (physical)भूतांशानि निरूपितानि, यानि आधिभौतिकानि तत्वानि निरूपितानि तान्यपि सांख्यदर्शने दृश्यन्ते। एवमाधुनिक विज्ञानयुक्तं सांख्यदर्शनं पुराणेषु विस्तरेण वर्णितं दृष्टम्। भौतिकपदार्थ विमर्शनेनैव अदृष्टं भगवत्स्वरूपं ज्ञेयमिति सांख्यदर्शनं प्रतिपादयति।

**उपयुक्तग्रन्थसूची –**


1. विष्णुसहस्रनामस्तोत्रम्-शङ्करभाष्यम् -श्लोक: -60
2. श्रीमद्भागवतम् – श्रीधरीयटीका – श्रीपण्डितरामतेजपाण्डेय: चौखाम्बा सुरभारती प्रकाशन् -2006
3. पुराणपर्यालोचनम् – चौखम्बा सुरभारती प्रकाशन – 2006
4. पुराणविमर्श: – बलदेवोपाध्याय: चौखम्बा संस्कृतप्रतिष्ठानम् – 1980
5. पुराणेतिहासयो: सांख्ययोगदर्शनविमर्श:-श्रीकृष्णमणित्रिपाठी- सम्पूर्णानन्द संस्कृत -विश्वविद्यालय:
6. पातञ्जलयोगदर्शनम् – चौखम्भा प्रकाशन वारणासी -2014


[11] श्रीमद्भागवतम् -3/26/20 त: 23 श्लोक: श्रीधरीयव्याख्या: